भूलोकस्यसमस्तस्यसालवच्चतुरस्रकं॥आवृत्यविष्ठितंतस्ययोजनायुतमुन्न
॥पद्म० ति:॥१८॥विस्तारश्चसएवास्यमूर्त्तिस्सर्वत्रचस्वयं॥मूर्त्तिभेदैरपर्यंतैपरमः
॥२७॥ पुरुषस्थितः॥१९॥कुमुदादिगणाश्चात्रचक्रादीन्यायुधानिच॥दृश्योमहीच
लक्ष्मीचविष्वक्सेनःपतत्रिराट्॥२०॥स्थानानिमूर्त्तिभेदानांविष्णोःपरिजन-
स्यच॥संतिभूयांसिरम्याणितत्रतत्रचतुर्मुख॥२१॥परंपारस्तरविस्तस्यालभ्यो
नयांतिभानुभिः॥आवृत्ततमःशैलंभागंवास्यमवस्थितं॥२२॥लोकालोकः
सचपुनःसमंताद्वेष्टितोगिरिः॥बहिरंडकटाहेनमहतासमनंतरं॥२३॥योज
नानामियंपृथ्वीपंचाशत्कोटिसंमिता॥सहैवांटकटाहेनसद्वीपाब्धिमहीध-
रा॥२४॥अनयाधीयतेसर्वंजगद्धात्रीततस्मृता॥२५॥इतिश्रीपंचरात्रेमहो
पनिषदिपाद्मेतंत्रेज्ञानपादेभूलोकविस्तारकथनंनामदशमोध्यायः॥१०॥
श्रीभगवानुवाच॥एषभूलोकविस्तारःकथितःकमलासन॥लोकानतस्ता ॥राम॥
दृशुतासप्तवच्मियथातथं॥१॥अतलंप्रथमंलोकोद्वितीयंवितलाह्वयं॥त- ॥२७॥

तीयंनितलंविशिष्टेयंतुर्यंगभस्तिमत्॥२॥पंचमंमहदाह्वंतंसुतलंषष्ठ
मीरितं॥पातालंसप्तमंविख्यातंचैकैकंसमुच्छ्रिताः॥३॥योजनानांसहस्राणि
दशैतेष्वतलादिषु॥वसंतिदानवादैत्याःकालेयाफणिनस्तथा॥४॥स्वर्गेपिन
भवंत्येवयेभोगास्तेतलादिषु॥भक्ष्यंभोज्यंतथापेयंस्वादिष्टंगुणवत्तरं॥५
प्रासादभूमयोरम्याःकांचनानिवनिम्नगाः॥नागकन्याश्चयत्रताःसंतिस
र्वांगशोभनाः॥६॥रत्नानांदीप्तिजालेनध्वांतेध्वस्तेदिवानिशं॥नार्कोन-
चंद्रमास्तत्रजनैरेवास्यतेक्वचित्॥७॥याश्रीतिसर्वदातत्रनसामुक्तात्म-
नामपि॥यज्ञांतकमिथ्यतेवस्तुदृश्यतेनतदुपस्कृतं॥८॥नमद्यतेक्वचित्कालोव-
स्तुतद्भोगतत्परैः॥स्वर्गादष्टगुणंभोगंअतलादिषुसत्तम॥९॥भुंजतेभोगनिर
तास्तेदैत्यदानवाः॥नदारिद्र्यंनरोगाश्चनक्षयानचदुःखिता॥१०॥बिलानि
दानवाःसंतिविपुलानिसमंततः॥सहस्रफणवान्विष्णुःकपिलोनामसत्तमे॥
११॥पातालास्थेतलादीनिआस्तेरक्षायकेवलं॥सर्वेपापैर्दैःसापंपुरमहनि

॥ पञ्च० शोभिते॥१२॥तामसींतनुमास्थायविष्णुरेषामधस्थितः॥सशालामतलादीनां
॥२८॥ दोषाख्योबलवत्तरः॥१३॥फणासहस्रसुभगोमणिभिर्दीपयन्दिशः॥अनंतइति
चभासैख्यातोलोकमहर्षिभिः॥१४॥यस्यमूर्ध्नैनिमालेवध्रियतेसकलामही॥कु
वैंस्वर्गादिदैत्यायानबलानामनेजसा॥१५॥किरीटीस्रग्धरःसुभ्रुर्मदाघूर्णितलो
चनः॥नीलवासासिततनुःकैलासइवभूधरः॥१६॥लांगलंमुसलंबिभ्रदायुधं
देवदारुणं॥उपास्यमानोबाहुभ्यांशंखसलिलधारया॥१७॥कल्पावसानेवक्त्रे
भ्योयस्यसंकर्षणःशिवः॥निष्क्रामतिजगत्सर्वंसंहर्तुंविषपावकः॥१८॥आस्तेस
पूजितःसर्वैःपातालतलवासिभिः॥नास्यवर्णयितुंशक्यागुणावक्तुंसुरैरपि॥१९
यदामदेनमूर्धानंकंपयन्नवतिष्ठते॥तदामहीतलंसर्वंसाद्रिवारिधिकाननं॥२०
कंपतेकश्चमेतास्यबलंवक्तुमशेषतः॥अधस्ताच्छेषफणिनःकूर्मःकालानलं
ज्वलः॥२१॥शिखासहस्रजटिलोदुःसहःकमलासनः॥आधारशक्तिरेतस्यअ ॥राम॥
धस्ताद्वैष्णवीतनुः॥२२॥अनंतरमथैतस्याभवखंडकटाहकः॥कर्मणःपुण्यरू ॥२८॥

पुण्यकथितानिफलभूमयः॥२३॥अधुनापापरूपस्यकथ्यंतेफलभूमयः॥भुवोज-
लस्यचाधस्तान्नरकाख्याभुवस्मृताः॥२४॥रौरवंप्रथमंतत्रमहत्पूर्वमनंतरं॥तत्र
पुत्तलिकाकुंभीपाकलावापणमीरितं॥२५॥सूच्यग्रंचक्षुरंचैवखड्गकर्तरिमान्वितः
सूकरंतैलकुंभंचमहाज्वालाचकंपिनी॥२६॥असिपत्रंपूतिवहंआम्रंसिंहंचका
दिकं॥तप्तस्तंभंकलाभक्षंशाल्मलीहेमपुष्पिता॥२७॥लालोदकंचकृमिंचुंचा-
न्किभिच्छेदनंतथा॥एवमादीनिचान्यानिफलान्याहुर्विकर्मणां॥२८॥नरकाणा-
मसंख्यानामेषादिकथितामया॥पापिनांस्तेषुपापिष्ठजंतवोभुंजतेफलं॥२९॥
नकर्मणांक्षयोअज्ञानिनाभोगैःपृथग्विधैः॥ज्ञानाग्निःसर्वकर्माणिभस्मसात्कु
रुतेद्रढं॥३०॥नःस्वर्गोनापिनरकोयोगविद्यामुपेयुषां॥इतिश्रीपंचरात्रेमहो
पनिषदिपाद्मतंत्रेज्ञानपादेभूतलादिलोकविस्तारोनामएकादशोध्यायः॥११
ब्रह्मा॥पंचाशत्कोटिविस्तीर्णंपृथिवीलक्षणंकथं॥प्रमाणंश्रोतुमिच्छामि ब्रू-
हिमेपुरुषोत्तम॥१॥श्रीभगवानुवाच॥अथातःप्रथमंजंबूक्षारंचतदनंतरं

॥पद्म०॥ ॥२९॥

प्लक्षद्वीपंतृतीयंतुपश्चादिक्षुचतुर्थकं॥२॥कुशद्वीपंपंचमस्यान्मेरेयंषष्ठमुच्य
ते॥सप्तमंक्रौंचकद्वीपंसमर्पिस्साष्टमंस्मृतं॥३॥नवमंशाल्मलीद्वीपंसोगश्चि
दशमस्मृतः॥एकादशंपुष्करंस्यात्तद्द्वादशंहेमसंज्ञितं॥४॥अंडभूमिस्त्रयोदशां
जीवनंचचतुर्दशं॥तद्धर्दंतुक्रमाद्द्व्यंशरणुष्वकमलासन॥५॥जंबूद्वीपंतथाल
क्षंलक्षारंतुसमंभवेत॥प्लक्षद्वीपंद्विलक्षंस्यादिक्षुंचैवद्विलक्षकं॥६॥कुशद्वी
पंचतुर्लक्षंमेरेयंतादृशंस्मृतं॥शाल्मलीचाष्टलक्षंतुसर्पिस्तादृशंतथा॥७॥
क्रौंचद्वीपंषोडशंचतत्समंदधिचारितं॥द्वात्रिंशल्लक्षमानेनपयश्चैवप्रमाणतः
॥८॥श्वेतद्वीपंतप्रमाणंपुष्करंतुतथोच्यते॥चतुःषष्ठिःप्रमाणेनपुष्करंतुसमी
रितं॥९॥पंचार्धकोटिकल्पंतुकोटिकादशंपरं॥पंचविंशतिकोटिस्तुअंडभूमि
रुदाहृता॥१०॥अशीतिर्हिमवान्प्रोक्तोलक्षार्धंविस्तृतंस्मृतं॥हेमकूटप्रमाणंतुस
हस्रंनवतिस्मृतं॥११॥विस्तारेतुतदर्धंस्यात्तद्युक्तंपर्वतत्रयं॥मध्येमध्यप्रमाणं
तुसहस्रंतुनवंस्मृतं॥१२॥मेरोरुत्तरपार्श्वेतुदशंदशंतुप्रमाणतः॥पूर्वपश्चिम ॥राम॥ ॥२९॥

तस्मैवपंचत्रिंशत्सहस्रकं॥१३॥ पंचाशत्कोटिविस्तीर्णास्वंभूमिकदाहृता॥ इ-
त्येषकथितोब्रह्मन्ज्ञालेवंपरिमाणकं॥१४॥ तदामहीतलंसर्वंसाद्विवारिविका
ननं॥ कंपतेकस्यमेतास्यबलंचकुमतोपलः॥१५॥ ब्रह्मा॥ विस्तारःकथितोभूमे-
र्लोकास्सप्ततलादिकाः॥ नरकाणितथान्यानिसंप्रतंभगवन्मम॥१६॥ पुनःप्र-
श्नलोकानांरूपंमानंचकथ्यतां॥१७॥ श्रीभगवानुवाच॥ यावत्प्रमाणापृथि-
वीविस्तीर्णापरिमंडला॥ तावद्भूवर्लोकंब्रह्मन्विस्तीर्णंपरिमंडलं॥१८॥ उपरि
ष्टाद्धिनव्योम्निलक्षयोजनसंख्यया॥ रविर्विनिष्ठतिमेरुंस्वैरंध्रभिर्भासयंजगत्॥
१९॥ रथमास्थायभगवान्बहुयोजनविस्तृतं॥ वामपार्श्वेरथस्यैकंचक्रंदिव्यंप्रति
ष्ठितं॥२०॥ वहंतिसप्तयःसप्तछंदांसिस्यंदनंमहत्॥ सारथिस्त्वारुणःसर्वानरसा
न्वाहयतिस्वयं॥२१॥ मानसोत्तरशैलस्यमूर्ध्निस्यंदनपद्धतिः॥ विभागहेतुरूप
सामन्त्तामासिगतिक्रमात्॥२२॥ योगिनांपरमःपंथामृतःकूरापरिक्षयं॥ मोक्ष
माणाःपथायेनयांतिविष्णोःपरंपदं॥२३॥ उदयास्तमयानेवभानोस्सर्वत्रसं

॥पत्र
॥३०॥

सुखः॥दर्शनादर्शनेभानोरुदयास्तमयौमतौ॥२४॥यैंयत्रदर्शतेभानुःसतेषा
मुदयस्मृतः॥यदायत्रनिशभावस्तत्रास्तमयदीनृणां॥२५॥स्थिताभवंतिपूर्वो
णंहरस्मयार्कस्यसंततं॥द्युलीभवंतिपश्चात्सूयाबन्नेषामदर्शनं॥२६॥वर्जैयि-
त्तापुरिंचानुःसर्वेतामेरुमूर्धने॥पतंतिभानवोभानोस्तिर्यग्‌र्ध्वंमचस्थिताः॥
॥२७॥स्वभांनुंब्रह्मणागत्वाप्रस्थितेर्यांतियथपुनः॥ब्रह्मणस्त्वजमात्ततनान्यस्व-
लनंघ्रच्चित॥२८॥भूसूर्ययोरंतरालंभुवस्त्वलमुदाहृतं॥विद्याधराप्सगंधर्वाः
सिद्धाश्चसहदानवैः॥२९॥वसंतिमुदितास्तेपुपुरेष्वथपृथक्‌पृथक्‌॥लक्षादि-
वाकरस्तानाद्भूमिनस्थानमीरितं॥३०॥तयोपरिष्टान्निष्टंतिनक्षत्राणियथात
थं॥लक्षद्वयमतीत्याद्धंबुधस्यस्थितिरुच्यते॥३१॥द्वात्रान्स्तुस्थितालक्षद्वयमु
त्तीर्यंनिष्ठति॥तस्याजनान्यतिक्रम्यभौमास्तिष्ठतिसर्वदा॥३२॥तावत्प्रमाणव
स्तानंगुरोस्तस्योपरिस्थितिः॥शनैश्चरस्तत्प्रमाणमतीत्योर्ध्वंरवेस्तुतः॥३३॥ल ॥यम॥ ॥३०॥
क्षलक्षक्रमाद्र्ध्वंनक्षत्रःमुनयःपरे॥परःसहस्राकरपयःसंतुपर्यूर्ध्वगामिनः

॥३४॥ततोध्रुवस्थितिस्थानेदृग्गोचरैर्महर्षिभिः॥द्वादशारंमहाचक्रंनेमीहृत्तस्य
नाभयः॥३५॥तिस्रःसंतिवसंत्यस्यमासवासोत्थरेषुत॥मेषादयोप्यरथैवंमी
नांताद्वादशस्थिताः॥३६॥मासाद्वादशचैत्राद्यावसंतप्रमुखास्तथा॥ऋतवःष
ट्संक्रमाश्चविषुद्धावयनद्वयं॥३७॥सितासितौचपक्षौद्वौयुगभेदाश्चवत्सराः
त्र्यादयःकालभेदाश्चक्रेचास्मिन्व्यवस्थिताः॥३८॥ध्रुवस्थितोनाभिमध्येप्रादक्षि
ण्येनगरायः॥प्रसव्येनग्रहाःसर्वेचरंतिगगनोदरे॥३९॥कुलालचक्रमध्यस्थ
मृत्पिंडसदृशोध्रुवः॥भ्रमंतिपरितःसर्वेध्रुवंज्योतिर्गणाःसदा॥४०॥आदित्य
ध्रुवयोर्मध्येदेशःस्वर्गसमाहूयः॥वसंतितस्मिन्गीर्वाणाःविमानेषुपृथक्पृथक्
४१॥असंख्यातानिनक्षत्राण्योतिर्मयवपुर्धराः॥तेषांगंगाजलंसव्यंपुष्पाणि
सुरभूरुहां॥४२॥वनाश्चचिंतामणयश्चियश्चाप्सरसःस्मृताः॥सिद्धादयोच
संत्यस्मिपुरेपुनिरुपद्रवाः॥४३॥रूपंद्रमूर्तिर्भगवानास्तेनक्षत्रसर्वदा॥रक्षं
तिस्वर्गनिलयान्देवान्दीनस्वेनतेजसा॥४४॥भूर्भुवःस्वस्तपोलोकालसाः

॥पद्म०॥ पंचदशस्मृताः॥तथापरंमहर्लोकःकोटियोजनमायतः॥४५॥सनंदनाद्यामु
॥३१॥ नयोवसंतिदशकोटयः॥ततःपरंजनोलोकःकोटिद्वयसमायतः॥४६॥अनं
तरंतपोलोकःस्थितःकोटिभिरष्टभिः॥योजनानांसप्तकोटिपुनस्तद्द्विगुणा-
यतं॥४७॥तद्ब्रह्मलोकंमुनयोगृणंतिकमलासन।लक्षयोजनविस्तारंसालप्रा
कारसंकुलं॥४८॥उत्तरेणब्रह्मलोकंविष्णुलोकंविदुर्बुधाः॥अंतरंलोकयोरु-
क्तंलक्षयोजनसंमितं॥४९॥तावत्येवांतरालस्यदक्षिणस्यांदिशिस्थितः॥शि
वलोकस्ततुर्वैकनस्मिंस्तास्तेशिवःस्वयं॥५०॥योजनानांकोटिरूर्ध्वंमुक्त्वैवपु-
रतस्थिते।सर्वात्माभगवारूद्धेतस्मात्कोटित्रयायते॥५१॥निरूत्यात्मानिवस
तिभगवानस्ययस्वयं॥तावत्येवस्थितामानविश्वात्मानिरुद्धश्वरः॥५२॥पु-
रुषात्मापरस्तात्तुचतुष्कोटिप्रमाणके॥स्थितःकोटिमतीसार्धेपंचपंचाद-
थस्थितः॥५३॥परमेष्ठीसभगवान्पंचकंविष्णुविष्टपं॥मध्यास्तेभगवान्नित्यं ॥राम॥
शंखचक्रगदाधरः॥५४॥पंचरात्रिमयोविष्णुःकोटियोजनसंमिते॥मास्ते ॥३१॥

श्रीभूमिसहितोवैनतेयेनसेवितः॥५५॥अंडभित्तिरुपर्यस्यस्थितालक्षंकोटि
योजने॥घनंचतस्याःकाष्ठानुसंमितंकमलासन॥५६॥रूक्मांहिरण्मयंज्ञेयमं
डंतद्विभिन्नावयं॥एतनांडकटाहेनलोकाःसर्वेसमावृताः॥५७॥ऊपर्युपर्यमी
लोकाःकपित्थफलवत्स्थिताः॥तद्दशान्तरसंख्येनवारिणापरिवेष्टिते॥५८॥अ
स्यांडंयथावारिस्थितंतद्वद्दग्निना॥सवायुनातद्दशव्योम्नात्वसमावृताः
॥५९॥सर्वेदशान्तरंविद्यात्तत्रोममहतावृतं॥अयंसर्वप्रधानेनप्रधानंतमसा
वृतं॥६०॥तदनंतरपर्यन्तंनसंख्यातस्यविद्यते॥हेतुभूतमशेषस्यतमसःप्र
कृतिःपरा॥६१॥अंडानामीदृशांब्रह्मनसहस्राण्ययुतानिच॥बहुनापिकिमु
क्तेनसंख्यावक्तुंनशक्यते॥६२॥अंडानितानिसर्वाणिव्याप्यनारायणःस्थितः
अंतश्चैवपांभगवानसर्वव्यापीपरःपुमान॥६३॥बहिश्चसाक्षिवत्सर्वंपश्य
मानोवतिष्ठते॥महतस्तमसोबाह्यलोकाःस्युर्बहुयोजनाः॥६४॥चत्वारःक
मशःसंतिचतुर्भिःसमधिष्ठिताः॥व्यूहैःक्रमेणवक्ष्येतानानिरुद्धपुरःसरः॥

॥६५॥प्रद्युम्नोनंतरंतेषांसंकर्षणसमाहूयः॥वासुदेवस्ततःपश्चाद्व्यूहाख्यः
कमलासन॥६६॥विभवाख्योवासुदेवस्तदनंतरमीरितः॥अनादिर्वासुदेव
श्चतयालोकाननुक्रमात्॥६७॥ततोनारायणस्यापिलोकःसंनिकटस्थितः॥
एकैकस्यांतरंकोटियोजनानामुदीरितम्॥६८॥तावानेवचविस्तारस्तेषामति-
मनोहरः॥तस्माद्बहिःस्थितोलोकोयत्रास्तेभगवानयं॥६९॥अनादिर्वासुदेवा
ख्यःशोभितमणिमंडपे॥शेषभोगासनेदिव्येश्रीमहीभ्यांसमास्थितः॥७०॥
व्याप्त्यादिभिस्तथाष्टाभिःशक्तिभिःपरिवारितः॥वालव्यजनहस्ताभिःसेव
मानाभिरंतिके॥७१॥सेनान्याद्यैःपार्षदैश्चचक्राद्यैरायुधैरपि॥प्रणमद्भिःसं-
श्रमानसामीप्यादिपदस्थितैः॥७२॥मुक्तैश्चपंचकालज्ञैःसिद्धैःकिंकरतांग
तैः॥उपास्यमानःसततंद्वादशाक्षरचिंतकैः॥७३॥अष्टांगयोगसंसिद्धैर्बहु
भिर्भगवन्मयैः॥पंचरात्रार्थतत्वज्ञैःनित्यदासैःसमीपगैः॥७४॥यथार्हभग
वद्धपकर्मनिष्ठैर्महात्मभिः॥दिग्पाकस्थिताक्षरधन्यानांतत्रनिष्ठतां॥

॥७५॥अनेनैतानांलोकानांमंडेषुबहिरप्यथ॥विस्तारःकथितोनैवदुर्गैहत्या
द्धवादृशोः॥७६॥सारमात्रंसमुद्धृत्यसर्वतःसमुदाहृतं॥ज्ञानंभगवतःकिंचिद
ज्ञानंहन्तहन्यते॥७७॥ब्रह्मा॥नष्टमज्ञानतिमिरंज्ञानंनदर्शितंमहत्॥सर्वंच-
संशयानष्टाप्रसादाद्भगवन्मम॥७८॥पद्मउवाच॥इतिगुह्यतमंज्ञानंभगवा
न्ब्रह्मणेददौ॥ब्रह्मापितथ्यथातत्त्वंकपिलायावतारयत्॥७९॥कपिलोपिम
हर्षिर्लतज्ज्ञानंममयथातथं॥ददौमस्यंतदितिसर्वंपारंपर्यैक्रमागतं॥८०॥सं-
वर्तज्ञानमुत्कृष्टंसत्यनुग्रहकाम्यया॥भगवन्मयमाख्यातंरहस्यंतरमद्भुतं॥
॥८१॥नैतत्वगुह्यंतमंज्ञानंमाख्येयंमतिमानते॥नाभक्तायनहीनायनचास्
श्रूषवेपुनः॥८२॥नादीक्षितायदातव्यंनकृतघ्नायपापिने॥ननास्तिकायचा
स्थ्येयंनचपाषंडिनेतथा॥८३॥नहीनवर्णिनेनैवापिरूनायदुरात्मने॥नैव-
चानुपसन्नायनवाप्यागमसंगिने॥८४॥नचाभ्यसूयवेनापित्यक्ताचारा
यकर्हिचित्॥वक्तव्यमपिविनीतायश्रद्धायब्रह्मचारिणे॥८५॥सत्स्वरूपवेप्र

॥पञ्च॰ ॥२३॥

संनायतथैववर्तिनेतथा॥ आश्रमस्थायसंसारविमुखायमुमुक्षवे॥८५॥
जिज्ञासमानायतथापंचरात्रादितात्क्रियां॥ स्वशीलायकृतज्ञायऋजवेऋजुबु-
द्धये॥८७॥ स्वंदास्यप्रीतिनेसांगकुलीनायतपस्विने॥ त्रैवर्णिकायसंवर्तम-
हर्षिसंहितामिमां॥८८॥ नाध्यापयेन्नोपदेशेन्नविश्वासमस्यवदेत्॥ कण्वः॥ हे
शिष्याकथितंसर्वंयसंवर्तमुखाच्छ्रुतं॥ विज्ञानंतदशेषेणभवद्भ्यःकथितंम-
या॥८९॥ योगंचाप्युपदेक्ष्यामिसकृपायदितत्रवः॥ यःसंहितामिमांप्राज्ञो
अधीतेनियमस्थितः॥९०॥ सब्रह्मलोकमभ्येतिनहभूयोपिजायते॥ श्लोक-
मेवंतदर्धंवापादमेकंस्मरेन्नरः॥९१॥ प्रत्यहंपठमानस्यफलमिष्टंकरेस्थितं
ज्ञानांशोद्वादशोध्यायःतंत्रेपाद्मेसमीरितः॥९२॥ संक्षिप्यसारमुद्धृत्यविस्ती
र्णात्तंत्रसागरात्॥ कृपयावोहशिष्याप्रसन्नेनांतरात्मना॥९३॥ इतिश्री
पंचरात्रेमहोपनिषदिपाद्मेतंत्रेज्ञानपादेभुवनकोशादिविस्तारकथनामद्वा ॥राम॥
दशोध्यायः॥५॥५॥५॥ ज्ञानपादःसमाप्तः॥५॥५॥५॥ ब्रह्मोवाच॥ ॥२३॥

भगवन्योगयुक्तस्यनिश्श्रेयसमुदीरितं।।पुरुषस्यदयासिंधोज्ञानिनःपुरु
षोत्तम।।१।।सयोगःकथ्यतांभूयःश्रोतव्योयदिमद्विधैः।।यदिवानुग्रहोन
स्मासुभजमानेषुविद्यते।।२।।श्रीभगवानुवाच।।अथाकुलस्यचित्तस्यबंधनं
विषयेक्वचित्।।यत्संयोगस्यनुवैश्चसचद्वैविध्यमश्नुते।।३।।कर्मकर्तव्यमित्येववि
हितेष्वेवकर्मसु।।बंधनंमनसोनित्यंकर्मयोगःसउच्यते।।४।।यत्तुचित्तस्यसततं
अर्थेश्रेयसिबंधनं।।ज्ञानयोगःसविज्ञेयःसर्वसिद्धिकरःस्मृतः।।५।।यस्योक्तल
क्षणेयोगेमद्विधेयंस्थितंमनः।।सयातिपरमंश्रेयोमोक्षलक्षणमंजसा।।६।।य
मादिरंगंपूर्वस्यवैराग्यादिपरस्यतु।।अशौयमादयोगानियमाहिंसादिलक्षणः
।।७।।अहिंसासत्यमस्तेयंब्रह्मचर्यंदयार्जवं।।क्षमाधृतिर्मिताहारोशौचंचेतिय
मादश।।८।।ततःप्रभृतिऊर्ध्वंतुनियमःकथ्यतेपुनः।।तपःसंतुष्टिरास्तिक्यंदा
नमाराधनंहरेः।।९।।सिद्धांतश्रवणंह्रीश्चजपस्त्यादिलक्षणः।।आमनादीनि
सर्वाणिस्वस्तिकादीनिसंप्रति।।१०।।तथ्यैनस्वस्तिकंपादतलयोरुभयोरपि

पूर्वोत्तरंजानुनीद्वेकृत्वासनमुदीरितं॥११॥सीविन्यांदक्षिणेपार्श्वेसव्यंसव्येतुद
॥पद्म० क्षिणं॥गुल्फंकृत्वासमंतच्चस्वस्तिकंकथ्यतेबुधैः॥आरोप्यचोर्वोश्चरणौतदंगुष्ठ
॥३५॥ द्वयंपुनः॥१२॥व्युत्क्रमेणैवहस्ताभ्यांगृह्णीयात्तदासनं॥बद्धंपद्मासनंह्येतंआ
सनेषुसुपूजितं॥१४॥एकंचरणमन्यस्मिन्नूरावारोप्यनिश्चलः॥आस्तेयदिदम
नोऽयंवीरासनमुदाहृतं॥१५॥सीवनींगुल्फदेशाभ्यांनिपीड्यव्युत्क्रमेणतु॥प्रसा
र्यजानुनोर्हस्तावासनंसिंहपूर्वकं॥१६॥गुल्फौचवृषणस्याधःसीवन्युभयपा
र्श्वयोः॥निवेश्यपादौहस्ताभ्यांदृढंबध्वायदासनं॥१७॥भद्रासनंतद्विज्ञेयंसर्व
पापप्रणाशनं॥गुल्फंसव्येतरंसव्यपृष्ठपार्श्वेविधायच॥१८॥गुल्फंतथेतरंपृ
ष्ठपार्श्वेऽन्यस्मिन्निधायच॥आसनंगोमुखंयद्वद्गोमुखासनमिष्यते॥१९॥सीवनीं
पार्श्वमुभयंगुल्फाभ्यांव्युत्क्रमेणतु॥निपीड्यासनमेतच्चमुक्तासनमुदाहृतं॥
॥२०॥मेढ्रस्योपरिनिक्षिप्यसव्यंगुल्फंतथेतरं॥निवेश्योपरिगुल्फस्यपक्षामु- ॥राम॥
क्तासनंभवेत्॥२१॥अवष्टभ्यधरांसम्यक्तलाभ्यांहस्तयोर्द्वयोः॥कूर्परौना ॥२५॥

भिपार्श्वेच्चश्चापयिलामयूरवत्॥समुन्नम्यशिरःपादंमयूरासनमिष्यते॥२२॥
इतिश्रीपंचरात्रेमहोपनिषदिपाद्मेतंत्रेयोगपादेआसनभेदविधिर्नामप्रथ
मोध्यायः॥श्रीभगवानुवाच॥यमश्चनियमैश्चैवयोगांगैरासनैरपि॥सुसंय
तोनाडिशुद्धोप्राणायामोविधीयते॥१॥देहमानंस्वांगुलीभिःषण्णवत्यंगुलाय
तं॥प्राणःशरीरादधिकोद्वादशांगुलमानतः॥२॥देहस्थमनिलंदेहसमुद्भूतेनव
ह्निना॥न्यूनंसमंवायोगेनकुर्वन्ब्रह्मविदिष्यते॥३॥देहमध्येशिखिस्थानंतप्तजांबू
नदप्रभं॥त्रिकोणंद्विपदामन्यच्चतुरस्रंचतुष्पदं॥४॥वृत्तंविहंगमानांतुषडस्रं
सर्पजन्मनां॥अष्टास्रंस्वेदजानांचतस्मिन्दीपवदुज्वलः॥५॥वैश्वानरोग्निपच्च
तिप्राणापानसमायुतः॥चतुष्प्रकारमशितंदेहमध्येभिधीयते॥६॥अपाना
त्त्यंगुलादूर्ध्वंअधोमेढ्स्यतावतः॥स्तरेयंतुदेहमध्यंसर्वेषामेवपद्मज॥७॥
चतुरंगुलमुत्सेधंचतुरंगुलमायतं॥कंदाकृतितिरश्चांचद्विपदांचचतुष्पदां
॥८॥कंदस्थानंमनुष्याणांदेहमध्यंनवांगुलं॥कंदमध्यंतदित्युक्तंतन्मध्यंनाभि

रिष्यते॥९॥तत्रचक्रंद्वादशारमाहुर्मासानराणितु॥विश्वादिमूर्तयस्तेषुद्वादश
॥पद्म०॥ द्वादशस्वपि॥१०॥अहंतत्रस्थितंचक्रंभ्रमयामिस्वमायया॥अरेषुभ्रमतेजीवः
॥३५॥ क्रमेणकमलासन॥११॥तंतुपंजरमध्यस्थायथाभ्रमतिलूतिका॥प्राणाधिरूढश्च
रतियःजीवस्तेनविनानहि॥१२॥तस्योर्ध्वेकुंडलीस्थानंनाभेस्तिर्यगदोर्ध्वतः॥
अष्टप्रकृतिरूपासाचाष्टधाकुंडलीकृता॥१३॥यथावद्वायुचारंचज्वलनादिर्चनि
त्यशः॥परितःकंदपार्श्वेतुनिरुध्यैवसदास्थिता॥१४॥मुखेनैवसमावेष्ट्यब्रह्मरं
ध्रमुखंयथा॥योगकालेनमरुतासाग्निनाबोधितासती॥१५॥स्फुरिताहृदया
काशेनागरूपामहोज्वला॥वायुर्वायुमुखेनैवततोयातिसुषुम्नया॥१६॥कंदम
ध्यस्थितानाडीसुषुम्नासुप्रतिष्ठिता॥पद्मसूत्रप्रतीकाशाऋजुरूर्ध्वप्रवर्तिनी॥१
॥१७॥ब्रह्मणोविवरंयावद्विद्युदाभासनालिका॥वैष्णवीब्रह्मनाडीचनिर्वाण
प्राप्तिपद्धतिः॥१८॥इडाचपिंगलाचैवतस्याःसव्येतरेस्थिते॥इडासमुत्थिताकं ॥राम॥
दाद्वामनासापुटावधी॥१९॥पिंगलाचोत्थितातस्मादन्यनासापुटावधि॥गां ॥३५॥

धारीहस्तिजिह्वाचदक्षचान्यनाडिकेस्थिते॥२०॥पुरतःपृष्ठतस्तस्यावामेतरदृ-
शौप्रति॥पूषायशस्विनीनाम्नीतस्मादेवसमुत्थिते॥२१॥मध्यतश्शूलवधिता
युमूलात्तलंपुषा॥अधोगतागुहूनाडीमेढ्रांतावधिरायता॥२२॥पादांगुष्ठावधि
कंदादधोयाताचकौशिकी॥दशप्रधानभूतास्ताःकथिताकंदसंभवाः॥२३॥त-
न्मूलाबहवोनाड्यःस्थूलासूक्ष्माश्चनाडिकाः॥द्विसप्ततिसहस्राणिस्थूलासूक्ष्मास्तु
पमन॥२४॥संख्यातुंनैवशक्यंतत्स्थूलमूलाःपृथग्विधाः॥यथाश्वत्थदलेसूक्ष्माः
स्थूलाश्चविततास्तथा॥२५॥प्राणापानःसमानश्चउदानोव्यानएवच॥नागःकू-
र्मश्चकृकलोदेवदत्तोधनंजयः॥२६॥चरंतिदशनाडीषुदशप्राणादिवायवः॥
प्राणादिपंचकंतेषुप्रधानंतत्रचद्वयं॥२७॥प्राणएवाथवाश्रेष्ठोजीवात्मानंबि-
भर्तियः॥आस्यनासिकयोर्मध्येहृदयंनाभिमंडलं॥२८॥पादांगुष्ठमितिप्राण-
स्थानानिकमलासन॥अपानश्चरतिब्रह्मन्गुदमेढ्रोरुजानुषु॥२९॥समानःस-
र्वगात्रेषुसर्वव्याप्यव्यवस्थितः॥उदानःसर्वसंधिस्थःपादयोर्हस्तयोरपि॥३

॥ पद्म० ॥
॥ २५ ॥

३०॥ व्यानः श्रोत्रोरुकट्यां च गुल्फस्कंधगलेषु च॥ नागादिवायवः पंच त्वगस्थ्यादि
षु संस्थिताः॥३१॥ तुंदस्थं जलमन्नं च रसान्‌ च समीकृतं॥ तुंदमध्यगतः प्राणः ता
नि कुर्यात्पृथक्‌ पृथक्‌॥३२॥ इत्यादिचेष्टया प्राणः करोति वपुषः स्थितिं॥ अपान
वायुर्मूत्रादेः करोति च विसर्जनं॥३३॥ प्राणापानादिचेष्टादि क्रियते व्यानवायु
ना॥ उदीर्यते शरीरस्थमुदानेन नभास्वयं॥३४॥ पोषणादि शरीरस्य समानः कु
रुते सदा॥ उद्गारादिक्रिया नागकूर्मोन्मेषादिनिमीलनः॥३५॥ कृकरस्तु क्षुतः कर्ता
देवो निद्रादिकर्मकृत्‌॥ मृतगात्रस्य शोभादि धनंजय उदाहृतः॥३६॥ नाडीभेदं
मरुद्भेदं मरुतां स्थानमेव च॥ चेष्टाश्चाविविधास्तेषां ज्ञात्वैवं कमलासन॥३७॥
शोधयेत्तेन नाडीनां वक्ष्यमाणेन वर्त्मना॥३८॥ इति श्रीपंचरात्रे महोपनिषदि
पाद्मतंत्रे योगपादे नाडीस्वरूपकथनं नाम द्वितीयोऽध्यायः॥२॥ श्रीभगवानुवाच
त्रैवर्णिकस्य वर्णोक्तैः स्वाश्रमानुगुणैस्तथा॥ आचारैराचरन्युक्तैर्वा कृतदेवार्च
नेरतः॥१॥ विविक्तं देशमासाद्य सर्वसंबाधवर्जितं॥ योगांगद्रव्यसंपूर्णं तत्र- ॥ राम ॥ ॥ २५ ॥

दारुमयेरुभे॥२॥आसनेकल्पितेदर्भाकुशाकृष्णाजिनादिभिः॥तालमानसमु
त्सेधेतालद्वयसमायते॥३॥उपविश्यासनंनिस्त्रंस्वस्तिकादियथारुचिः॥बध्वा
प्रागाननःसम्यगृजुकायःसमाहितः॥४॥नासाग्रन्यस्तनयनोदंतैर्दंतानसंस्पृश
न्॥रसनांतालुनिस्सम्यक्स्थाप्यबाहुदयानिलः॥५॥आकुंचितशिरःकिंचिन्निब
ध्नन्योगमुद्रया॥हस्तौयथोक्तविधिनाप्राणायामंसमाचरेत्॥६॥रेचकंचपूरणं
वायोरोधनंरेचनंतथा॥चतुर्भिःक्लेशनंवायोःप्राणायामउदीरितः॥७॥हस्तेनद
क्षिणेनैवपीडयन्नासिकापुटं॥शनैःशनैरथबहिःक्षिपेत्पिंगलयानिलं॥८॥
द्वात्रिंशन्मात्रयाकुंभोपूरयेदिडयानिलं॥भूयःषोडशमात्राभिःचतुःषष्ठ्यात्र
मात्रया॥९॥संपूर्णंकुंभवद्देहंकुंभयेन्मातरिश्वना॥पूरयन्नाडयःसर्वाःपूर्यंते
मातरिश्वना॥१०॥एवंकृतेसतिब्रह्मन्स्पंदंतिदशवायवः॥हृदयांभोरुहंचा
पिव्याकोशंभवतिस्फुटं॥११॥पूरणेनतथाकुंभीकरणादुन्मुखंस्थितं॥गल
कूपविरूढंतुनरस्योमुखपंकजं॥१२॥नालंनालमिदंतस्यदलाष्टकसमन्वि

तं॥कदलीपुष्पसंकाशांचंद्रकांतसमप्रभं॥१३॥संध्ययोर्मध्यरात्रेचप्राणाया-
॥पद्म० मास्तुषोडश॥एकाहमात्रंकुर्वाणःसर्वपापैःप्रमुच्यते॥१४॥त्रिमन्येबहुभिर्मा
॥३७॥ सैःप्राणायामपरायणाः॥निर्धूतसर्वपापास्तेवत्सरत्रयपूरणे॥१५॥पश्यं
तिमामपिब्रह्मनहृदयांभोरुहस्थितं॥संवत्सरत्रयादूर्ध्वंप्राणायामपरोनरः॥
॥१६॥योगसिद्धोभवेद्योगीवायुजिद्विजितेंद्रियः॥अल्पाशीस्वल्पनिद्रश्चते
जस्वीबलवानभवेत॥१७॥अपमृत्युमतिक्रम्यदीर्घमायुरवाप्नुयात॥प्रस्वेद
जननंयस्यप्राणायामेषुसोधमः॥१८॥कंपनंवपुषेयस्यप्राणायामेषुमध्य-
मः॥उत्थानंवपुषोयस्यसउत्तमउदाहृतं॥१९॥अधमेव्याधिपापानांनाशस्य
न्मध्यमेपुनः॥पापरोगमहाव्याधिनाशस्यादुत्तमेपुनः॥२०॥अल्पनिद्रोल्प
मूत्रश्चलघुदेहोमिताशनः॥वश्येंद्रियःपटुमतिःकालत्रयविदात्मवान.
॥२१॥रेचकंपूरकंमुक्त्वाकुंभीकरणमेवच॥करोतित्रिषुलोकेषुवैनतस्यास्ति ॥राम॥
दुर्लभं॥२२॥नाभीकंदेत्वनासाग्रेपादांगुष्ठेणयत्नवान॥धारयन्मनसाप्राणा ॥३७॥

नसंध्याकालेतुसर्वदा॥२३॥सर्वरोगविनिर्मुक्तोजीवेद्योगीगतक्लमः॥कुक्षि
रोगविनाशस्यानाभिकंदेषुधारणात्॥२४॥नासाग्रेधारणादीर्घमायुर्वैदेह-
लाघवं॥पादांगुष्ठेभवेद्धृत्वावायोःकमलसंभव॥२५॥वायुमाकृष्यजिह्वाग्रे
पिबंनश्रमदाहभाक्॥ब्राह्ममुहूर्तेसंप्राप्तेवायुमाकृष्यजिह्वया॥२६॥पिबत
स्त्रिषुमासेषुवाक्सिद्धिर्महतिध्रुवं॥अभ्यस्यतस्तुषण्मासान्महारोगविनाश-
नं॥२७॥यत्रयत्रयुतोवायुरंगेरोगादिदूषिते॥धारणादेवमरुतस्तत्तदारोग
मश्नुते॥२८॥मनसाधारणादेवश्वसनाधारितोभवेत्॥मनसस्थापनाहेतु-
रुच्यतेकमलासन॥२९॥करणानिसमाहृत्यविषयेभ्यःसमाहितः॥अपानादू
र्ध्वमाकृष्यवक्त्रेणापरिधारयेत्॥३०॥बध्नान्करभ्यांश्रोत्रादिकरणानियथा
तथं॥युंजानस्ययथोक्तेनवर्त्मनास्ववशंपुनः॥३१॥मनोवशात्चवैवायुःस्वव
संस्थाप्यतेसदा॥नासिकापुटयोप्राणःपर्यायेणप्रवर्तते॥३२॥तिस्रश्चना
डिकाप्राणाःतावंतिश्वरतिद्वयं॥शंखिनीविवरेयास्येप्राणःप्राणभृतांस-

॥पप्र॰ ॥३८॥

तां॥२३॥तदंतस्य पुनःकालंसोम्यचरतिसंततं॥इत्थंक्रमेणचरतावायुनावा
युनिश्वरः॥२४॥अहंचरात्रिंपक्षंचमासमृत्वयनादिकं॥अंतमूर्ध्वाविजानीया
त्कालभेदंसमाहितः॥२५॥अंगुष्ठादिस्वावयवस्फुरणादर्शनैरपि॥अरिष्टैः
जीवितस्यापिजानीयात्क्षयमात्मनः॥ज्ञात्वायतेतकैवल्यप्राप्तयेयोगवित्तमः
॥२६॥इतिश्रीपंचरात्रेमहोपनिषदिपाद्मतंत्रेयोगपादेप्राणायामलक्षणं
नामतृतीयोध्यायः॥३॥ब्रह्मा॥भगवन्कान्यरिष्टानिकथंतैर्जीवितक्षयः॥सू
च्यतेसंशयस्यास्यछेदनेकारणंभवान्॥श्रीभगवानुवाच॥पादांगुष्ठकरां-
गुष्ठस्फुरणंयस्यनस्यति॥तस्यसंवत्सरादूर्ध्वंजीवितस्यक्षयोभवेत्॥१॥म-
णिबंधेतथागुल्फस्फुरणंयस्यनस्यति॥षण्मासावधिरेतस्यजीवितस्यस्थि
तिर्भवेत्॥२॥कोर्परस्फुरणंयस्यतस्यत्रैमासिकीस्थितिः॥कक्षमेहनपार्श्वे
चस्फुरणाद्युपलंभने॥३॥मासावधिर्जीवितस्यतदर्धंस्वेददर्शने॥आश्रि ॥गम॥ ॥३८॥
तेजाठरेचापिदिनानिदशजीवितं॥४॥ज्योतिःस्वस्येवयस्यतदर्धंतस्य

जीवितं॥जिह्वाग्रादर्शनेत्रीणिदिनानिस्थितिरात्मनः॥ज्वालाग्रादर्शनेमृत्युर्द्वि
दिनेनैवसंशयः॥एवमादीन्यरिष्टानिदृष्ट्वायुःक्षयकारणं॥७॥निःश्रेयसाययुंजी
तजपध्यानपरायणः॥मनसास्यनुष्ठानंयदिदंनित्यकर्मणां॥८॥प्रत्याहारस्सवि
ज्ञेयोगांगलेनरसेवितः॥यद्वाष्टादशभेदेषुमर्मस्थानेषुधारणं॥९॥स्थानात्स्थानंस-
माकृष्यसाप्रत्याहारनिरिष्यते॥पादांगुष्ठेतथागुल्फंजंघामध्यंतथैवच॥१०॥मध्यमू
र्वोश्चमूलंचपायुर्हृदयमेवच॥मेहनंदेहमध्यंचनाभिंचगलकूर्परं॥११॥तालु
मूलंचमूलंचघ्राणस्याक्ष्णोश्चमंडले॥भ्रुवोर्मध्यंललाटंचमूर्धांचापितनःपरं॥
॥१२॥मूलंचकर्णयोर्मूलंसमाण्येतानिपद्मज॥पंचभूतमयेदेहभूतेष्वेतेषुपं-
चसु॥१३॥मनसोधारणंयत्तद्युक्तस्यचयमादिभिः॥धारणासाचसंसारसाग
रोत्तारकारणं॥१४॥आजानुपादपर्यंतंपृथिवीस्थानमिष्यते॥पीतत्वाच्चतुर
स्राच्चवसुधावज्रलांछिता॥१५॥स्मर्तव्यापंचघटिकास्तत्रारोप्यप्रयुंजते॥त
स्योपर्युलमूलांतंवारिस्थानंचतुर्मुख॥१६॥अर्धचंद्रसमाकारंश्वेतमंबुज-

लांछितं॥स्मर्तव्यमंगेश्वसनंआरोप्यदशनाडिकाः॥१७॥अनाभिदेहमध्यांत म-

ग्निस्थानमुदाहृतं॥तत्रसिंदूरवर्णोग्निस्तस्मात्कोद्दशपंचच॥१८॥स्मर्तव्योनाडिका
प्राणंकृत्वाकुंभकधारितं॥नाभेरुपरिनासांतंवायुस्थानंमतत्रच॥१९॥वेदिका
कारकद्धूमोबलवान्भूतमारुतः॥स्मर्तव्यःकुंभकेनैवप्राणमारोप्यमारुतं॥२०
घटिकार्विशतिस्तस्मात्प्राणानब्रह्मबिलावधि॥व्योमस्थानंनभस्तत्रभिन्नांज
नसमप्रभं॥२१॥व्योमंमारुतमारोप्यकुंभकेनैवयत्नवान्॥विस्तंभयेद्रादेहस्य
चतुर्वालुमलंकृतं॥२२॥मन्निरुर्ध्वंहृद्यंयोगीयत्नेनभवमुक्तये॥अस्मिंस्त्वपूरये-
द्योगीनारायणमुदग्रतिः॥२३॥प्रद्युम्नमथवावायौवासंकर्षणमनःपरं॥व्योमं
वापरमात्मानंवासुदेवंसमर्चयेत्॥२४॥अचिरादेवतत्प्राप्तियुंजानस्यनसंशयः
॥२५॥इतिश्रीपंचरात्रेमहोपनिषदिपाद्मेतंत्रेयोगपादेपंचभूतस्थानभेदनि
र्णयोनामचतुर्थोध्यायः॥४॥श्रीभगवानुवाच॥बद्ध्वायोगासनंपूर्वहृद्देशे-

रचितांजलिः॥नासाग्रन्यस्तनयनोजिह्वांकृत्वाचतालुनि॥१॥दंतैर्दंतानसं

स्थस्यऊर्ध्वकायःसमाहितः॥संहरेदिंद्रियग्रामंततोबुध्याविचक्षणः॥२॥चिं
तनंवासुदेवस्यपरस्यपरमात्मनः॥स्वरूपस्यास्वरूपस्यसहस्रांबुरुहासन॥३॥
यत्नध्यानंपरंमोक्षंनिकैवल्यफलदंसदा॥यावन्मात्रंवासुदेवंचिंतकेत्कुंभकेनयः
४॥सप्तजन्मकृतंपापंतस्यनस्यतियोगिनः॥नाभिकंदात्समारभ्ययावत्हृद-
यगोचरं॥५॥जागृद्वृत्तिंविजानीयाकंठस्थंस्वप्नवर्तनं॥सुषुप्तंतालुमध्यस्थंतु-
र्यंभ्रूमध्यसंस्थितं॥६॥तुर्यातीतंपरंब्रह्मब्रह्मरंध्रेतुलक्षयेत॥जाग्रद्वृत्तेःसमा-
रभ्ययावत्ब्रह्मबिलांतरं॥७॥सतोदयंततुर्यस्यातुर्यांतेविष्णुरुच्यते॥ध्यानेनै
वसमायुक्तोव्योम्निचात्यंतनिर्मले॥८॥सूर्यकोटिद्युतिधरंनित्योदितमधोक्ष-
जं॥यद्हृदांबुरुहासीनंध्यायेद्वाविश्वरूपिणं॥९॥अनेकाकारखचितंअनेकव-
दनान्वितं॥अनेकभुजसंयुक्तंअनेकायुधमंडितं॥१०॥नानावर्णधरंदेवंशांत
मुग्रमुदायुधं॥अनेकनयनाकीर्णंसूर्यकोटिसमप्रभं॥११॥ध्यायतोयोगिनः
सर्वंमनोज्ञानंविनश्यति॥हृत्पुंडरीकमध्यस्थंचैतन्यंज्योतिरव्ययं॥१२॥कंद

वर्गोज्वकाकारंतृतीयाल्मंद्वलापरं॥अनंतमानंदमयंचिन्मयंभास्वरंविभुं॥१३
॥पद्म० निवातदीपसदृशंमकृत्रिममणिप्रभं॥ध्यायतोयोगिनस्तस्यमुक्तिःकरतले-
॥५०॥ स्थिता॥१४॥विश्वरूपस्यदेवस्यरूपंदेवंचयत्किंहि॥स्थविष्ठःसूक्ष्ममन्यद्वाप-
श्यन्हृदयपंकजे॥१५॥ध्यायतोयोगिनोवस्तुसाक्षादेवप्रकाशते॥अणिमा-
दिफलंचैवसकलंकाकथापरं॥१६॥जीवात्मनःपरस्यापियद्यैक्यमुभयोरपि
ममादिसंतुविज्ञेयःसाधकानांप्रसादकः॥१७॥अहमेवपरंब्रह्मज्ञातादिदंध्यान
मास्थितः॥स्थाणुभूतोदृढःशश्वद्धियापश्चाद्बुध्यते॥१८॥यथावास्वजलंपा
त्रंप्रविष्टंनिर्मलंनिधिं॥तत्स्वभावंसजातितथाजीवःप्रलीयते॥१९॥प
रमात्मनिवैकुंठेसमाधिस्थस्ययोगिनः॥अविद्यापरयेतत्वेष्वभिलाषाप्रवर्त
ते॥२०॥तमुपायंप्रवक्ष्यामिशृणुपद्मलोकमलासन॥द्वादशाक्षरमभ्यस्यपरमा
त्माध्ययाहरिं॥२१॥भामूर्ध्नभूमौलिखितंचक्रपद्मस्यलक्षणं॥तस्योपरिस्व ॥राम॥
विस्तीर्णंसमासीनःकुशासने॥२२॥बध्वापद्मासनंयोगीसितपक्षेतथोत्त ॥५०॥

रे॥सपनेरवसनंपूर्वंधारयित्वायथापुरं॥२३॥देहमध्यस्थितंवह्निंदीपयित्वा
समुज्वलं॥हृत्पुंडरीकमध्यस्थंस्मरन्ब्रह्मसनातनं॥२४॥विद्युत्सहस्रसंकाशंयु
गांतानिलसंनिभं॥तन्मयंचस्वदेहंतंकृत्वातद्ब्रह्मरश्मिभिः॥२५॥भूतदेहं
दहेत्कृत्स्नंदग्ध्वामंत्रस्वरूपहृत्॥मुक्तांडइवपक्षीशआसीनश्चिंतयेच्छनैः॥२
॥२६॥ध्यानेपरिणतांमंत्रतनुंतेजोमयींसदा॥चिन्मयींसर्वगांशान्दस्वरूपंभा
वयन्नपि॥२७॥शनैःशनैःरश्मिजालंविनिवार्यततःस्वयं॥ब्रह्मसंपद्यतेयोगीन
पुनःसंसरेदिह॥२८॥इत्येवंयोगसारोयंकथितंकमलासन॥नित्यक्रियाल-
सराणांसंसारविमुखात्मनां॥२९॥मद्भक्तानांदीक्षितानांतन्त्रायमुपसीद-
तां॥इदंभवहरंपुण्यंयोगंसर्वार्थसिद्धिदं॥योधीतगुर्वनुज्ञातःसयातिप-
रमांगतिं॥३०॥इतिश्रीपंचरात्रेमहोपनिषदिपाद्मेयोगपादेयोगलक्षणं
नामपंचमोध्यायः॥५॥योगपादःसमाप्तः॥ब्रह्मोवाच॥भगवन्देवदेव
तारांसच्चक्रगदाधर॥ज्ञानंचयोगंचकार्येननिर्वाणफलदोस्मृतो॥१॥

तयोरविदुषांदेवनाधिकारःकदाचन॥अज्ञानिनांचभक्तानांगतिलाभिरु-
॥पद्म० वानृणां॥२॥येनोपायेननिर्वाणफलंस्वर्गादिचेतनत॥भवत्युपायंतमस्मनु-
॥४१ मुपदेष्टुंत्वमर्हसि॥३॥श्रीभगवानुवाच॥कर्मणाधनधान्यस्त्रीसमाराध्य
नतत्परः॥आप्नोतिफलमन्यत्रप्राप्नोत्येवनसंशयः॥४॥तस्थापयित्वामांस्था
नेशास्त्रदृष्टेनवर्त्मना॥यजस्वमांवक्ष्यमाणविधिनाकमलासन॥५॥कर्षणा
दिप्रतिष्ठांतंक्रियाविधिमतःशृणु॥वक्ष्यामियेनविधिनाप्रसीदाम्यचिरा
दहं॥६॥अधीतानितायेनित्यासुशास्त्राणिश्रुतपूर्वेणः॥तेमांभजंतेपुरुषा
ज्ञानयोगपरायणाः॥७॥अन्येषामप्यविदुषांभक्तानांमहतुसंपदां॥जायते
सिद्धिरचिरात्स्थानेस्थापयतांचमे॥८॥ज्ञानंयोगश्चयदिदंकेवलंमुक्तिकार
णं॥स्थापयित्वाच्युतंस्थानेपुरुषःसर्वमश्नुते॥९॥योमांसंस्थाप्यसदनेसमा
राधयतिस्वयं॥नतस्यकेवलंसिद्धिर्नानाभ्यण्व्यजुषामपि॥१०॥तस्मात्सर्वा ॥राम॥
त्मनाप्रसन्नस्थानेमांस्थापयेत्सुमान्॥द्विविधंस्थानमाख्यातंसिद्धासिद्धप्र ॥४१॥

भेदतः॥११॥मूलेमूर्ध्निशिलानांनद्यास्तीरेचसंगमे॥समुद्रतीरेपुलिनेह्र-
दतीर्थेचकानने॥१२॥एतेषुनिर्मितंस्थानंमिश्राख्यंविश्वकर्मणा॥देवादि-
भिरहंतत्रस्थापितश्चयथाविधि॥१३॥मनुष्यैर्निर्मितंग्रामनगरादौग्रहंम-
म॥अमिश्रायतनंविद्धिग्रामाधिष्ठितिहेतुकं॥१४॥अश्रावानास्तिकोभक्तो
यनेवान्यैःकर्मथिना॥महोत्साहश्चनिर्दक्षकृतज्ञोलोभवर्जितः॥१५॥ब्राह्म-
णःक्षत्रियोवैश्यःशूद्रोवाअनुलोमजः॥जातिभिर्यजमानंतंसर्वैःसमुदितंगुणैः
॥१६॥पंचरात्रविदंशान्तंमिश्रान्तेपृच्छतंश्रमं॥भगवद्द्राजंरक्षंअलोलुप-
मडांविकं॥१७॥अपापमृजुमध्यात्मदृष्टंपरमास्तिकं॥तंभागवतमाचा-
र्यंप्रथमंवरयेत्सुधीः॥१८॥आचार्योयजमानश्चदेवज्ञेनरूमदिने॥ग्रामा-
धिष्ठापनायादौनिमित्तानिपरीक्षयेत्॥१९॥रूर्भनिमित्तंग्रामादीनृत्ना-
रंभेतविचक्षणः॥सुपरीक्षादिकंसर्वंरथकारेणवैसह॥२०॥आचार्यःपंच
रात्रज्ञःकुर्यादभ्युदयार्थतः॥रूपमाभद्रकापूर्णाधूम्राश्चेतिचतुर्विधाः॥

२१॥ भूमयोलक्षणंतासांक्रमेणोपदिश्यामिते॥चंपकागरुखर्जूरकदंबति
 लकार्जुनैः॥२२॥क्रमुकैर्नारिकेलैश्चकुराकार्यैःसमावृता॥पद्मोत्पलासमा
कीर्णाश्रागुरुकुंअवणावृता॥२३॥यात्वेतायावृताभूमिःसाश्रपद्मेतिकीर्ति
ता॥नदीसागरपार्श्वस्थातीर्थायतनमाश्रिता॥२४॥क्षीररससमाकीर्णाफ
लरससमाकुला॥उद्यानोपवनोपेतालतागुल्मसमावृता॥२५॥यज्ञदर्भा
कुशाकाशाश्रीहिशस्याणितन्नवै॥अथोजलसमोपेताभद्रकादिनिसाश्मता
२६॥कुलसपंकुनिष्पावाकोद्रवश्यामकान्विता॥गिरिपार्श्वस्थिताचैवगि
रिशिखरमाश्रिता॥अम्रभूतादकाभूमिःसापूर्णेतिप्रकीर्तिता॥यवचणका
दिसंकीर्णास्नुहिखेधातकान्विता॥२८॥विभीतकार्कसंकीर्णाकांचनारक
ान्विता॥वायसश्येनगृध्राद्यागोमायुवृकसंकुला॥२९॥कूपराधैःसमोपेतासा
धूम्रेतिप्रकीर्तिता॥सुपमाशांतिदाभूमिःस्वल्पदाभद्रकाभवेत्॥३०॥सुपूर्णा 
पुष्टिदाभूमिःक्षयदाधूम्रकाभवेत्॥दंडमात्रांयतोभूमिःतावद्विस्तारसंयुतां 

३१॥जानुमात्रंखनेद्भूमिंमृद्भिस्ताभिश्चपूरयेत्॥अधिकेचोत्तमांविद्यात्समेचैवम
ध्यमांभवेत्॥३२॥न्यूनेधमांविजानीयात्तांभूमिंपरिवर्जयेत्॥शालिमुद्गयवा
दीनांउप्तानीजानिवैभुवि॥३३॥परीक्षकःपरीक्षेतअरत्नामथचोत्तमां॥अंकु
रोत्पत्तेयत्रत्रिरात्राभ्यंतरेमहीं॥३४॥तामुत्तमांविजानीयात्पंचषड्भिस्तुमध्य
मां॥३५॥अधमासप्तरात्रेस्यादूर्ध्वंचानंकुरे॥वर्जयेदधमांभूमिंज्ञापयेदन्य
योर्द्वयोः॥कुशापलाशाहरिणासंतियत्रस्वयंभुवि॥३५॥अधमामपितांविद्धि
प्रशस्तांकमलासन॥रसेनमधुरेणाद्यांमुत्तमांकुरमासना॥३६॥मध्यमामधमा
मम्लांरसैरन्यैश्चविनिश्चितां॥श्वेतवर्णोत्तराभूमिर्मध्यमापीतलोहिनी॥३७॥अ
धमाकृष्णवर्णास्यादित्येवंभूमिलक्षणं॥वास्तुविद्यागुरुर्विज्ञाक्रियासुनिपु
णेनच॥३७॥रथकारेणसहितःकुशलःपंचरात्रवित्॥आचार्यःप्रथमंविप्र
प्रवेशबलिमुत्तमं॥३८॥आचार्योयजमानेनसहितोवास्तुसीमनि॥नृत्यैर्वाद्यै
श्चनुर्यैश्चतथामंगलपाठकैः॥३९॥पूर्णकुंभैस्तथादीपैर्ध्वजच्छत्रसमन्वितैः

॥ पुन्न० ॥ ब्राह्मणैर्ज्ञानसंपन्नैरध्यायानैबहुश्रुतैः॥ ५०॥ प्रदक्षिणंपरिक्रम्यमंत्रैस्तस्यप
॥ ५३॥ नैरपि॥ विदिक्षुदिक्षुपूर्वादिबलिंकुर्यात्समंततः॥ ५१॥ भूतानांचपिशाचानां
रक्षसांदितिजन्मनां॥ ग्रहाणामपिनागानांअन्येषांचबलिंक्षिपेत्॥ ५२॥ ब्रह्म
स्थानांतमध्येनपायसेनमहीसुरः॥ बलिंप्रक्षिप्यतदनुमंत्रमेतमुदीरयेत्॥ ५३
भूताःपिशाचानागाश्चअसुराराक्षसाग्रहाः॥ सर्वेतेव्यपगच्छंतुबलिंतुष्टायथा
मयं॥ ५४॥ देवानांचद्विजानांचस्थानंसम्यक्करोम्यहं॥ वासुदेवस्यदेवस्यसर्वभू
तात्मकस्यच॥ ५५॥ अस्त्रमंत्रेणसंजप्तान्सिद्धार्थान्सर्वतःक्षिपेत्॥ कृत्वाबलिं
यथाशास्त्रंसूत्राण्यपिचपातयेत्॥ ५६॥ शंकुंसंस्थापयेत्तत्रसूत्रसंधिषुसर्वतः
अधोमुखंमाकुंचिरसंविन्यसेद्वास्तुपूरुषं॥ ५७॥ प्रसार्यपाणिपादौद्वौकोण
मूपुप्रकल्पितौ॥ एवंध्यात्वासमभ्यर्च्यपुरुषंवास्तुकल्पितं॥ ५८॥ तस्यदक्षि
णपार्श्वेनुवास्तुहोमंप्रकल्पयेत्॥ स्थंडिलेदीपयित्वाग्निंपंचोपनिषदाघृतं॥ ॥ राम ॥
५९॥ सहस्रंवाशतंवापिजुहुयाद्वास्तुशांतये॥ अपामार्गंस्मुदाश्वत्थखदिर ॥ ५३॥

स्त्वयथाक्रमं॥५०॥यस्यरक्षःपिशाचानांसमिधोजुहुयात्स्वयं॥हुत्वानुमूलमं-
त्राभ्यांपृथगष्टोत्तरंशतं॥५१॥वास्तुनाथस्यमंत्रेणचरुणाजुहुयाद्धृतं॥पूर्णा-
हुतिंततोहुत्वाइंद्रादीनांबलिंक्षिपेत्॥५२॥दिक्षुप्रभुषुयथालीयंएवंग्रामादि
कल्पयेत॥५३॥इतिश्रीपंचरात्रेमहोपनिषदिपाद्मेतंत्रेक्रियापादेभूपरीक्षा
विधिर्नामप्रथमोध्यायः॥श्रीभगवानुवाच॥ग्रामादीनांचतुर्वर्गफलदानांय
थाक्रमं॥स्वरूपंतत्प्रभेदंचवक्ष्यामितवसांप्रतं॥१॥वसंतिब्राह्मणायत्रस्थानं
ग्रामःसउच्यते॥अग्रहारंचतस्यैवनामधेयांतरंस्मृतं॥२॥क्षत्रियाणांतथावा-
संपुरंनगरमित्यपि॥वैश्यानांपत्तनंवासोमठिकाकूलमित्यपि॥३॥दंडकंस्वस्ति
कंचैवप्रस्तरंचप्रकीर्णकं॥नंद्यावर्तंपराकंचपद्मंचश्रीप्रतिष्ठितं॥४॥ग्रामा-
दिष्वभेदास्तेषांशृणुतेषांचलक्षणं॥पूर्वापरमुत्तराग्रंचयावन्मानंभवेदथ॥५
दंडवत्प्रभवेद्वीथिस्तद्दंडकमुदाहृतं॥पूर्वापरमुत्तराग्रंचकुर्याद्वीथीद्वयंपुनः
६॥दक्षिणाभिमुखामूलापूर्वेविथ्यास्तुनिर्गमः॥पश्चिमाभिमुखामूला

दक्षिणस्यांस्तुनिर्गमः॥७॥उत्तराभिमुखोभूत्वापश्चिमस्यांस्तुनिर्गमः॥प्राङ्मु
॥पद्म० खःस्तुततःप्रोक्तःसोमदिग्भ्यांस्तुनिर्गमः॥८॥एवंप्रकल्पितोग्रामःस्वस्तिका
॥५४॥ ह्वयरुच्यते॥एवमेवंतुसर्वेषांग्रामादीनांतुनिर्गमः॥९॥त्रिचतुःपंचषट्सप्तवी
थयश्चउदङ्मुखाः॥प्राङ्मुखैस्तुत्रिभिर्युक्तःप्रस्तरःपरिकीर्त्यते॥१०॥पूर्वाग्र
मुत्तराग्रंचरथ्याभिस्त्रिभिर्युतं॥प्रकीर्णकमिदंज्ञेयंमभिप्रेतार्थसाधनं॥
११॥पूर्वंतुदक्षिणंचैवपश्चिमंचोत्तरंयथा॥ग्रामस्यनिर्गमश्चैवचतुर्दिक्षुवि
धीयते॥१२॥त्रयोदशार्थवीथिरेकैकमधिकंभवेत्॥नंद्यावर्तंभवेत्संचपंच
भिःप्राङ्मुखैर्युतं॥१३॥अष्टादशाभिरेकैकंवर्धितंपंचभिस्तथा॥उदङ्मुखेपरा
कंस्यानप्राङ्मुखेषड्भिरेवच॥१४॥त्रयोविंशतिवीथीनांप्राच्येपंचाउदङ्मु
खैः॥सप्तभिःप्राङ्मुखैर्युक्तंपद्मग्राममुदाहृतं॥१५॥अष्टाविंशतिवीथीनां
पूर्वाभिश्चापिउदङ्मुखे॥अष्टाभिःप्राङ्मुखैर्युक्तंश्रीप्रतिष्ठितमुच्यते॥१६ ॥राम॥
एवमष्टविधंप्रोक्तंग्रामादीनांविशेषतः॥ग्रामादीन्संचवारुत्वाभागमेकं ॥५४॥

वहित्यनेन॥१७॥ब्राह्मंदैवंमानुषंचपैशाचमितरंपुनः॥चतुष्टयंविजानीयाऽ
भागानांतत्रदैविके॥१८॥मानुषेचद्विजातीनांग्रहाणिपरिकल्पयेत्॥पैशाचे
दैवचिह्नानिदिक्षुयथासुत्तमध्यमे॥१९॥ग्रामस्यगर्भविन्यासंद्विजानांस्थापना
सुरा॥मध्येकुर्यात्सुराणांतुदिक्षुवर्णाःपत्तनेपुनः॥२०॥कौबेर्यांदिशिगर्भस्यन्या
सएवमुदाहृतः॥धातुलोहानिरत्नानिकंदंबीजंमृदंतथा॥२१॥भाजनेलोहजे
कृत्वाधारयेन्मृन्मयेपिवा॥उपोषितःस्थपतिःस्नात्वानवक्त्रोत्तरीयकः॥२२॥रा
त्रौमुहूर्तेसंप्राप्तेगर्भाधानंसमाचरेत्॥आदायभाजनंपश्चात्स्वमानेहरिंस्मरे
त्॥२३॥ध्यात्वातुवसुधांदेवींमंत्रमेनमुदीरयेत्॥सर्वभूतधरेकांतेपर्वतस्तन
मंडिते॥२४॥समुद्रपरिधानीयेदेविगर्भंसमाश्रय॥रत्नैश्चमृद्भिस्ततःसम्यक्
पूरयित्वासमंततः॥२५॥पंचरात्रंत्रिरात्रंवारक्षांकुर्यात्दिनेदिने॥शालनिष्कंत
दर्धंवातदर्धार्धमथापिवा॥२६॥अथवायादक्षिणांदद्यात्स्थपत्याचार्ययोगृहर
त्न॥द्विगुणंत्रिगुणंनिष्कंपुरादौदक्षिणास्मृता॥२७॥गर्भन्यासंकृत्वापश्चा

द्विजानसंवेशयेगृहे ॥ वासुदेवान्यथान्यायंक्रमेणस्थापयेत्सुधीः ॥ २८ ॥ स्थापये
॥ पद्म० ॥ द्ग्राममध्येतुपंचमूर्तिमयंहरिं ॥ विप्राणांपंचयज्ञार्थंएवंसाकल्यमश्नुते ॥ २९ ॥
॥ ४५ ॥ चातुराश्रम्यसिध्यर्थंचतुर्मूर्तिमथापिवा ॥ सर्वांकमेकमूर्तिंवाग्राममध्येसम-
र्चयेत् ॥ ३० ॥ योगिनंभोगिनंवापिकारयेदच्युतंप्रभुं ॥ आसीनंवाशयानंवाति
ष्ठंतंवासमर्चयेत् ॥ ३१ ॥ सृष्टिरूढ्गागशयनंदेवदेवस्यकीर्तितं ॥ संहारयोगशय
नंतथानरहरेर्वपुः ॥ ३२ ॥ विश्वरूपधरंदेवंग्रामदग्ध्यंचनार्चयेत् ॥ प्राग्द्वारंद्रूक्ष
दंविद्धिपश्चिमंपुष्टिवर्धनं ॥ ३३ ॥ धनदंचोत्तरद्वारंयाम्यद्वारंत्वमोक्षदं ॥ एवंतु-
भास्करस्थानंप्रत्यग्द्वारंप्रकल्पयेत् ॥ ३४ ॥ पावकमदनस्थानंप्रत्यक्द्वारंप्रकल्प
येत् ॥ सुब्रह्मण्यस्ययाम्यस्थानपूर्वंद्वारंनिकेतनं ॥ ३५ ॥ नैऋतेविघ्नराजस्यपूर्व
द्वारंभवेत्स्मृतं ॥ वारुण्यांद्वापयेद्विसुंश्रीभूमीसाहितंस्थितं ॥ ३६ ॥ आसीनंवा
थ्ययापितंगरुडारूढमथवा ॥ विश्वरूपधरंभोगशयनंवाप्रकल्पयेत् ॥ ३७ ॥ प्रा ॥ राम ॥
ड्मुखंतुप्रकुर्वीतपश्चिमेविष्णुमंदिरं ॥ पश्चिमेतुश्रियंस्थानंअथवाकल्पये ॥ ४५ ॥

गवृषः॥३८॥वायव्यांप्राङ्मुखस्थानंदुर्गायैवप्रकल्पयेत्॥धनदंचोत्तरेस्थाप्य
जंभलादिसमन्वितं॥३९॥ऐशान्यामीश्वरंकुर्यात्सोमेशानांतरेपिवा॥इंद्रेशा-
नांतरेवापिनान्यत्रपरिकल्पयेत्॥आग्नेय्यांचमहामोडींग्रामादूरतरेस्थितां॥
नैऋत्येचैवयाम्यांग्रामादूरतरेस्थितं॥४१॥ग्रामस्यचोत्तरेपार्श्वेकिंचिद्दूरतरे-
स्थितं॥मातृस्थानंभवेत्तत्रसर्वोल्लाशोत्तगननाः॥४२॥ईशान्यांवाथमातृणां
नातिदूरेगृहंभवेत्॥आग्नेयंवागृहंदुर्गोवायुसामांतरेपिवा॥४३॥स्कुपाने-
पुसर्वेपुचिह्नलेमूर्ध्निसंधिषु॥देवस्थानंनकर्तव्यंवीसग्रपुनिरोपतः॥४४॥
ग्रहाग्नेनेवकर्तव्यास्तत्रवैराधिमिधृता॥प्रमादात्तेषुकुर्याच्चग्रामादीनांक्ष-
योभवेत्॥४५॥मंत्रहीनंक्रियाहीनाहव्यकव्येषुकर्मसु॥प्रायश्चित्तंभवेत्तस्य
ग्राममध्यान्नैनाद्दरेः॥४६॥मार्गधनभास्करस्यग्रामेरोगोनजायते॥सौभा-
ग्यसौम्यसौंदर्यगुणाःकामस्यपूजनात्॥४७॥भूताद्यानृणांनैवभवेयुर्ग्र-
हपूजनात्॥सर्वेनिस्ताविनश्यंतिविघ्नराजस्यपूजनात्॥४८॥वारुण्यांपू-

नयेद्दिव्यंभुक्तिफलप्रदं॥दुर्गांसंपूजयेद्देवींनित्यमायुर्विवर्धिनीं॥४९॥धन-
॥पद्म०॥ ॥४५ धान्यसमृद्धिस्यात्कुबेरपरिचर्यया॥ज्ञानवंतोनराःसर्वेभवेयुःपरिपूजनात्॥
५०॥षष्ठीपूजनयानित्यंबालानांनविपद्भवेत्॥शास्तुःपूजनयानित्यंबालानां
नविपद्भवेन्नरस्संतिग्रामवासिनः॥५१॥मातृपूजनयानित्यंपिशाचानैवपीड-
काः॥पुरंचमठिकायांचमध्येनस्थापयेद्धरिं॥५२॥वासोनुलोमजानांचमध्येन
हरिमर्चयेत्॥शूद्राणांप्रतिलोमानांनवास्तुर्नैवदेवताः॥५३॥यदिस्यादविवे
केनराजाराष्ट्रंनस्यात्॥देवासवार्थंग्रामादौवास्तुदेवंनकल्पयेत्॥५४॥अं-
गानिनैवस्वांगानिकल्पयेत्स्वतंत्रवत्॥कल्पयेयुःप्रजाराज्ञोराष्ट्रस्यप्रतिकूल
ता॥५५॥मुनीनांकेशवादीनांमत्स्यादीनांतथैवच॥अंतरालेषुसर्वेषुदिक्षु
चैवविदिक्षुच॥५६॥सर्वत्रभगवद्ध्येयंग्रामादौकारयेत्सुधीः॥ग्रामप्रस्तंनकु
र्वीतद्यमुख्यायतास्वनं॥५७॥नामदग्निनृसिंहेन्वसंहारश्यायनंतथा॥सर्वत्र ॥राम॥
भोगशयनंभोगस्थानकमेवच॥५८॥भोगस्थानंचसर्वत्रशयनंसुष्ठिसंज्ञि ॥४५॥

सं॥यानंगंचग्निर्योपेतंसर्वैश्चैवतुकारयेत्॥४९॥ग्रामांतरेनकुर्वीतस्थानंदेवस्यशू
लिनः॥विनश्यंस्यचिराद्ग्रामोगणनाथस्यतथैवच॥५०॥तस्माद्दूरतरेकुर्याद्ग्रामादी
नामुपरपांते॥एवंसंस्थाप्यदिग्देवान्पूजकःपूजयेत्क्रमात्॥५१॥विप्रोभागवतै
रेवपंचरात्रपरायणैः॥पूजाकार्यानसामान्यदेवतामात्रपूजकैः॥५२॥शिवस्य
शिवशास्त्रज्ञैःपूजनंचापिवह्निजैः॥सोमपाभिर्द्विजैर्ब्रह्मकार्यंदिनकरार्चनैः॥
॥५३॥मदनंगणनाथंचसुब्रह्मण्यंशिवद्विजः॥पूजयेद्नंदादीनांपूजकोविप्रद
ष्यते॥५४॥दुर्गांसंपूजयेद्देवींसदाभागवतस्स्वयं॥मातृणामर्चनंकार्यंतद्वेपार
शवैस्तथा॥५५॥शास्ताऽरंचमहामारींकुलालःपूजयेत्तथा॥सवर्णोंवृष्टका-
लज्ञानग्रामस्यांतर्नकल्पयेत्॥५६॥अन्येषांप्रतिलोमानांबहिर्ग्रामात्प्रकल्प
येत्॥प्राच्यादिष्वनुलोमानांस्थापनंकर्मणाभवेत्॥५७॥सर्वेषांप्रतिलोमा-
नांदक्षिणादिषुकल्पनं॥श्रेणिष्वपिबहिर्दूरेचंडालानेकतैस्मृता॥५८॥ग्रा
मस्यचोत्तरेतीरेश्मशानमुदकाशये॥याम्येनरेतटाकस्यश्मशानंस्याद्द्विजन्म-

नां॥९॥सर्वेषामनिलोमानांदाहः आच्यादिगोदांस॥इत्थंप्रकल्पयेद्ग्रामंनगरं
॥पञ्च० कुलमेवचा॥१०॥मुक्तिमाप्नोतिसपुमान्पुनरेवनजायते॥उपकुर्वंतियेमर्त्याद्र
॥४१॥ व्यैर्वामनसापिवा॥११॥स्वर्गलोकेवसंत्येतेकालंकल्पावसानिकं॥रक्षंतियेय-
थाकृत्संग्रामादीन्पृथिवीश्वरः॥१२॥तेषांतुकीर्तिमतुलांनाकपृष्ठेवसंतिच
येचालयंतिमनुजानायतेतेरसनोनिषु॥१३॥इतिश्रीपंचरात्रेमहोपनिषदि
पाद्मतंत्रेक्रियापादेग्रामविन्यासोनामद्वितीयोध्यायः॥२॥श्रीभगवानुवाच
ब्रह्मन्मंदिरनिर्माणंअहंवक्ष्यामितच्छृणु॥पूर्वोक्तांभूमिमासाद्यप्रवेशबलि
पूर्वकं॥१॥भूमिंप्रदक्षिणंकृत्वामंत्रमेतमुदीरयेत्॥यक्षाःपिशाचानागाश्च-
यत्रतिष्ठंतिसर्वदा॥२॥सर्वेप्ययांतुतेन्यत्रविन्यासस्थानंकरोम्यहं॥ततोस्त्रमंत्र
संसिक्तान्सिद्धार्थान्सर्वतःक्षिपेत्॥३॥पूर्ववद्वास्तुहोमंचकुर्याद्वास्तुबलिंत- ॥राम॥
था॥ततोभागवताचार्योहलेनविलिखेद्भुवं॥४॥ब्राह्मणोयजमानस्यादेन ॥४१॥
द्धानगौरवर्णकः॥क्षत्रियोलोहितोवैश्यःपीतःशूद्रस्तुमेचकः॥५॥यथा-

कवर्णोलाभेनुकपिलोगौरएवच॥ऋषभौरक्तवर्णौनौमहांतौसबलौमनो
॥५॥ शालेयक्षुरदर्भगादीनभूषयेत्कनकादिभिः॥हलंयुगंचपालाशंब्राह्मण
स्यविधीयते॥७॥न्यग्रोधक्षत्रियःस्यात्प्लक्षंविट्शूद्रयोर्भवेत्॥न्यग्रोधपि
प्पलौस्यातांसर्वेषांयुगलांगलौ॥८॥सर्वेषामेववर्णानांसौवर्णःकुशलोभवेत्
राजतंताम्रमथवायोक्त्रेषांयथाक्रमं॥९॥कृषाधनुर्जौवीरण्यंकाशास्तुरज्जुश्चत
न्मयः॥युगांचहलमध्यंचकारयेदेकयोनिकं॥१०॥स्नातोनवांबरधरःस्रग्वी
घःरुचिरासनवान्॥माल्यानुलेपनयुतःसोत्तरीयपरिच्छदः॥११॥भूषितस्तथ
माचार्यैःपादौप्रक्षालयेत्ततः॥आचम्यायम्यचप्राणान्न्यासंकृत्वायथाविधि
१२॥द्विजेंद्रैरभ्यनुज्ञातःकर्षणंप्रारभेत्ततः॥पुण्याहंवाचयित्वातुवेदमवैर्मंत्र
विचमः॥१३॥योजनेदृषभस्कंधेयुगंवैमूलनिश्चया॥लांगलंचयुगेनैवयोज
नेदिध्यधानया॥१४॥सुमुहूर्तेसुलग्नेचकारयेत्प्राङ्मुखस्थितः॥भेरीपटहशं
खादीन्घोषयेत्सर्वेदिक्षुच॥१५॥सुलंयाकुलिनोविप्राःपठेयुःसर्वशांतिदं॥

॥पंप्रं०॥ इत्सरोजेचमांध्यायेद्विधारूपेणचस्रुपा॥१६॥दंडंप्रचयणंकुर्यात्पलाशादि-
॥५८॥ महीरुहं॥मादायतोधनंपश्चात्पीडयेद्दृढदानिना॥१७॥प्राङ्मुखःप्रथमंत्र्यल-
कर्षयेन्मूलविद्यया॥सूक्तेनपौरुषेणैवद्वितीयंभूमिकर्षणं॥१८॥तृतीयंविष्णु
सूक्तेनगायत्र्याचतुरीयकं॥नारायणानुवाकेनकर्षणंपंचमंस्मृतं॥पंचोपनि
षदैर्मंत्रैःषष्ठस्याद्भूमिकर्षणं॥सप्तमंभूमिसूक्तेनकर्षयेद्देशिकोत्तमः॥२०॥प्राद
क्षिण्यक्रमेणैवसीतास्यात्कमलासन॥दक्षिणोत्तरतस्तद्वत्कर्षयेत्पंचरात्रवित्॥
२१॥निमित्तानिप्रपश्येत्तत्कालेदेशिकोत्तमः॥देशिकस्यमतस्तुष्टिस्तत्कालेक-
र्मणेभवेत्॥२२॥विपर्ययेक्षयंविद्धिप्रासादयजमानयोः॥अनडुत्सुयुगेनैव
वयोऽश्वादीनांचभेदने॥२३॥व्यत्यासेभ्रमणेचैवदुर्निमित्तादयस्तथा॥शान्तिं
दोषास्तसर्वेनाशितिमंत्रेणचयोजयेत्॥२४॥पंचोपनिषदाकुर्यात्शतंवाराज्यतोहुती
आचार्यौयजमानश्चब्राह्मणांस्तर्पयेत्ततः॥२५॥कृष्टांभुवंसमांकुर्यात्जलेन ॥राम॥
महतानतः॥आलवालांस्ततःकृत्वाजलकुल्यासमन्वितान्॥२६॥शालिमुद्ग- ॥५८॥

यवादीनितत्रबीजानिवापयेत्॥सिक्तंप्रतिदिनंक्षेत्रंतोयेनमहताभवेत्॥
२७॥रक्षांचकुर्यात्सर्वत्रपरिपाकावसानिकं॥पक्वंलुनीयतत्क्षेत्रमानयेत्गोकु
लानितत्॥२८॥फलंमहान्तिनग्रामदीर्घकालंभविष्यति॥अल्पमल्पतरंका
लंग्रामादस्मान्निहरेत्॥२९॥फलहीनेभवेद्ग्रामप्रक्षीणधनधान्यकं॥ब्राह्मणान्
भोजयेत्तत्रसहस्रंशतमेववा॥३०॥भुक्तवत्स्वादनंदद्याद्ब्राह्मणेभ्यागवादिका
न्॥प्रोक्षयेत्पंचगव्येनपंचोपनिषदाभुवं॥३१॥कुद्दालैर्वाखनित्रैर्वायावद
म्भःखनेत्क्षितिं॥अधमावरणंयावत्तावद्धिप्राग्रख्यते॥३२॥दंडमात्रायतंगं-
धंखनेद्धाकमलासन॥क्षेत्रदोषानुरूपेणमंदिराद्धपणेनवा॥३३॥शुल्लख
न्यमानतुभस्मांगारतुषादिकं॥दुष्टसत्वापलंभतुक्रमिकीटादिदर्शने॥३४
जुहुयाद्धोमयेत्तेषांमान्त्रायैःसर्पिरादिना॥ब्राह्मणेभ्यायथाशक्तिदद्यात्से
मादिकंधनं॥३५॥रत्नादिदर्शनेग्रामसमृद्धंसर्वदाभवेत्॥खातहोमंविहि
खातान्तस्थंडिलेचतुरस्रके॥३६॥रत्नापद्मात्रिमादीप्यकुर्याद्दाग्येनदेवा

कः॥मूलमंत्रेणसूक्तेनपौरुषेणचरुंपुनः॥३७॥गुग्गुलुंनलिनीवागंजुहुया
॥पंच०॥ न्मूलविद्यया॥पुण्याहंवाचयित्वानुशालिंस्वानेविनिक्षिपेत्॥३८॥कुंभानुप
॥५९॥ रिशालीनांसूत्रवस्त्रादिवेष्टितान्॥कुंभाल्लोहमयाप्रोक्तास्तद्दलाभेतुमृन्म
याः॥३९॥आधारशक्तिंसौवर्णीकृत्वाकुंभेविनिक्षिपेत्॥मध्यमंतदनुप्राच्यां
कुंभेबीजानिनिक्षिपेत्॥४०॥आग्नेयांसर्वलोहानिसर्वधातूनदक्षिणे॥
पुण्यतीर्थमिदंकुंभेनैऋत्येवारुणेपुनः॥४१॥मधुनापूरयेत्कुंभंवायव्यांतु
सर्पिषा॥स्वर्णेनस्वरकुंभेऐशानेशैलमृत्तिकां॥४२॥निक्षिपन्मध्यमेकुंभे
शालिक्षेत्रमृदंतथा॥नद्यास्यहृदसंभूतांवल्मीकभवमृत्तिकां॥४३॥कंदा
न्नीवारसुलादीनांप्रक्षिपेमाध्यमुत्तमान्॥लोहरत्नानिचतथानिदध्यात्अष्ट
कूर्चकं॥४४॥सर्वद्रव्याद्यमग्रेणक्रमेणपरिपूरयेत्॥कुंभस्योपरिमध्यस्य
कुंभमन्यंनिवेशयेत्॥४५॥विन्यायकूर्मंकालाग्निंसौवर्णेतत्रनिक्षिपेत्॥ ॥राम॥
कुंभंतृतीयंविन्यस्यतत्रानंतारुनिमवेत्॥४६॥चतुर्थंचरकृपादारमुपरि ॥५९॥

स्थानघटं क्षिपेत् ॥ गंधोदकेन तु कुंभान् पूरयित्वा समर्चयेत् ॥ ५७ ॥ रत्नानं
ड्भिश्च पुण्यानि दृष्टाभिरदूषणैः ॥ पूरयेद्वालुकाभिश्च जलैश्चापरिपूरये
त् ॥ ५८ ॥ हस्तिपादे दृढं कृत्वा पुनस्तोयैश्च पूरयेत् ॥ ५९ ॥ इति श्रीपंचरात्रे
महोपनिषदि पाद्मे तंत्रे क्रियापादे कर्षणविधिर्नाम तृतीयोऽध्यायः ॥ ब्रह्मा
उवाच ॥ आरभ्यमाणे प्रासादे ग्रामादौ च जनार्दन ॥ ये विघ्नकारिणो दैत्याः
यक्षदानवराक्षसाः ॥ १ ॥ तेषां यथा भवेच्छांतिस्तद्ब्रूहि भगवन्मम ॥ श्रीभग
वानुवाच ॥ कृत्वा बालग्रहं पूर्वं तत्र मामर्चयेत्सुधीः ॥ प्रत्यूहकारिणः सर्वे न
नश्यंति नु ध्रुवं ॥ २ ॥ ग्रामादिश्चापि राष्ट्राणि प्रत्यूहसमाप्यते ॥ इंद्रेशानां
तरे वापि सोमेशानांतरेऽपि वा ॥ ३ ॥ इंद्राग्निमध्यमध्ये वा पावकस्य यमस्य च
यमस्य निर्ऋतेर्मध्ये निर्ऋतेर्वरुणस्य च ॥ ४ ॥ मध्ये वरुणवाय्वोर्वा वायोः सो
मस्य चांतरे ॥ यथाभिमतमेतेषामारंभायतनं प्रति ॥ ५ ॥ स्थाने बालग्रहं
विंध्यात्समपंच विहस्तकं ॥ धाम्नो मूलस्य बलजं दिशि यत्र प्रकल्पते ॥

६॥द्वारं बालालयस्यापि तत्रैव परिकल्पयेत्॥ बिंबं बालालये लोहमाद्यमानं
॥पद्म० वाथ दारवं॥७॥शंखचक्रगदापद्मादिव्यायुधचतुर्भुजं॥उत्सेधस्तस्य बिंबस्य
॥ ५०॥ हस्तपंचांगुलो भवेत्॥८॥त्र्यष्टविंशान्निम्नेव वा सार्धांगुलयवस्य वा॥मानं स्व-
स्थावहंयस्या यजमानस्य नङ्ग्वेत्॥९॥मत्स्यादिष्ववतारेषु कल्पेषा रम्यमंदि
र॥बालालयेपि तद्ध्यानं विश्वरूपचतुर्भुजं॥१०॥यानगं यानगं चापि स्थान-
कं चापि कल्पयेत्॥जलधिवास्य तत्बिंबं मंडपे चाधिवासयेत्॥११॥बालाल
यस्य मध्ये वा भागे दिव्यापि वा तदा के॥मेखलात्रयसंयुक्तां वेदिं हस्तसमुच्छ्रितं॥
॥१२॥कृत्वाग्र भानं विमलमुहूर्ते शोभने गुरुः॥मूलमंत्रेण वेद्यां तु बालाबिंबं
निवेशयेत्॥१३॥स्नापयित्वा हरिं तत्र मंत्रन्यासो यथाविधिः॥आर्घं येन हरिं त
त्र मां निधेहि बालमंदिरे॥१४॥सामूलधामा निर्दैन्यैः समयादेरिकान्नमः॥पू
जां गृण्हीष्व भगवन् तस्मिंस्त्वं बालमंदिरे॥१५॥रामयन्मूलधिष्ण्यस्य विस्त ॥राम॥
रं देवसंहतिं॥इति निज्ञाप्य तत्स्वात्परिवारान्प्रकल्पयेत्॥१६॥द्वारे चंडप्र ॥ ५०॥

चंडंचक्षेत्रपालंचगेश्वरं॥इंद्रादिलोकपालांश्चस्वासुदिक्षुप्रकल्पयेत्॥१७
सेनेशमीशकोणेषुगणेशंनैरृतेयजेत॥मरारीश्गतान्देवान्स्थंडिलेपूजयेद्बुधः
॥१८॥स्थंडिलंहस्तमात्रंतुमेखलात्रयसंयुतं॥वृत्तंवाचतुरश्रंवाकृत्वातत्रस-
मर्चयेत॥१९॥कुमुदादिगणान्देवान्महापीठेसमर्चयेत॥एवंसंस्थाप्यमंदे
वीकुर्याद्देवमहोत्सवं॥२०॥ध्वजारोहणपूर्वंस्यात्पुष्पयागावसानकं॥एकाह
मथवाकुर्यादुत्सवंबालमंदिरे॥२१॥लोहवंबालबिंबंचनतेवोत्सवमाचरेत्
नित्यंनैमित्तिकंकाम्यंकार्यंबालालयेभवेत्॥२२॥उत्सवार्थंनचैवबिंबंबालतै
वोत्सवंभवेत्॥नकुर्याद्बलिविन्यासंचतुर्थीस्नपनंतथा॥२३॥आरभेतस्थपति
भिःसार्कंरथरुद्रालयं॥मुख्यंशिलामयंधाममध्यमंचेष्टकादिकं॥२४॥जघ
न्यंदारुजंविद्यान्मृन्मयंहेममुच्यते॥मिश्रशिलादिभिर्द्रव्यैरेकानेकलयोगतः
२५॥संचितासंचितस्यात्तांउपसंचितमेवचा॥द्रव्येणकेरयश्रामस्त्यंतंपरि
कल्पितं॥२६॥अष्टंतसंचितंविद्याद्व्ययुग्ममसंचितं॥सदनंमध्यमंविद्या

॥पद्म०॥ ॥५१॥

त्रिभिरीर्वादिभिःकृतं॥२७॥कूपसंचितमाख्यातंअधमंचामलद्भवेत्॥गर्भेषु
कोशलादारुसर्जयेद्देवतालये॥२८॥कुर्यान्नेशमयंविश्वायजमानोनसंशयः
देवतांतरसंभस्त्वंनगृण्हीयाद्यात्शिलादिकं॥२९॥तेनैवसदनंकुर्यान्नाशयेद्धंसमात्मनः
पच्यतेनरकेघोरेजायंतेश्वरयोनिषु॥३०॥मठकूपतटाकेनरथ्याग्रामंशिलादि
कं॥नरकेपच्यतेघोरेजायंतेनिर्धनंध्रुवः॥३१॥वासुदेवालयाद्दारुपाषाणंवा
तदिष्टकं॥गृहीत्वाविश्वनिर्माणेकर्तादुःखैकभाजनं॥३२॥पर्यायेणव्रजेद्घोर
नरकान्भूरिदारुणान्॥पच्यतेतेषुदुःखेषुपर्यायेणसदानरः॥३३॥न्यायेनसं
चितैर्द्रव्यैर्निर्मितेसदनेहरेः॥फलमक्षयमाप्नोतियजमानोनसंशयः॥३४॥अ
न्यायोपार्जितैर्द्रव्यैस्सदाभुंजतेफलं॥जलेनसमतांवीक्ष्यबिंबस्यप्रकीर्तितो
॥३५॥तस्मादादायफलकांप्रथमांताम्रचस्रूपा॥ऋचयातान्दृढीकृत्यजा
नीयात्समतांजलैः॥३६॥कृत्वाथपीठमुपरितस्याधिष्टानमुत्तमं॥विनापा
थुपपीठेनस्याद्दधिष्टानकल्पनं॥३७॥उपानहंकल्पयित्वास्यादधिष्टानक ॥राम॥ ॥५१॥

ल्पनं॥अथवाकल्पयेत्पूर्वंमधिष्ठानमुपानहं॥३८॥पादंत्वप्रस्तरंचैवग्रीवांच
शिखरंतथा॥कुर्याच्चथाक्रमंयावत्स्तूप्येकतलकल्पने॥३९॥द्वितलेचाप्यधि
ष्ठानंचरणंप्रस्तरंतथा॥कूटंचशालासंस्थानंपंजरंप्रस्तरंपुनः॥४०॥वेदींग्री
वांचशिखरंक्रमेणस्तुविकल्पयेत्॥त्रितलादिविमानानांआद्वादशतलान्तिमं
४१॥एवंप्रकल्पयशास्त्रोक्तमितरेष्वेवकल्पयेत्॥उपानंजगतींचैवकुमुदंपट्टि
कस्तथा॥४२॥कंठंचपट्टिकांचैवमहतीपट्टिकास्तथा॥वाजनंवेदिकांचैवच
रणंचतथान्तरं॥४३॥हंसमालाकपोतंचप्रतिमप्रतिवेदिका॥कंठंचशिख
रंचैवक्रमेणाष्टादशांशकं॥४४॥चाप्यस्तूप्यंतमथवायजमानानुरूपतः॥कु
कुर्यात्पद्दादोनिर्माणंकृत्वापूर्वंविचक्षणः॥४५॥इतिश्रीपंचरात्रेमहापनि
पनिषदिपाद्मतंत्रेक्रियापादेबालालयकल्पनंनामचतुर्थोध्यायः॥४॥श्री
भगवानुवाच॥प्राचींपरीक्ष्यपूर्वंदिशांशास्त्रोक्तवर्त्मना॥प्राच्यादिदिग्वि
भागेनद्वारादीविधिरिष्यते॥१॥हस्तमानायतंशंकुंद्वादशांगुलमेववा